**प्रथम-सत्रीया परीक्षा**

**आदर्शप्रश्नपत्रम्**

**(सम्पूर्ण-पाठ्यक्रम-अधिकृत्य)**

**2022-2023**

**कक्षा- दशमी**

**विषयः संस्कृतम्**

**समयः होरात्रयम्** **पूर्णांकाः 50**

## खण्ड - क
## अपठित-अवबोधनम्

**प्रश्न-1. अधोलिखितम् अनुच्छेदम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**

भारतवर्षे बहूनि दर्शनीयानि तीर्थस्थानानि सन्ति। यानि दृष्ट्वा जीवनं पवित्रं भवति। मनः च प्रसन्नं भवति। तेषु एव तीर्थस्थानेषु एकं तीर्थस्थानमस्ति कन्याकुमारी। इदं तीर्थस्थानं भारतस्य दक्षिणे कोणे विराजते। देव्याः कन्या-कुमार्याः सान्निध्येन पावनमिदं तीर्थस्थानम्। अरबसागर-हिन्दमहासागराभ्यां परिवृतं स्थानमिदं प्राकृतिक-सौन्दर्यपरिपूर्णं वर्तते। तत्र स्थित्वा सूर्योदयस्य सूर्यास्तस्य च दृश्यं द्रष्टुं सुकरं भवति। पूर्णिमायां तिथौ तु सायं पूर्वस्यां दिशि चन्द्रोदयः पश्चिमायां च सूर्यास्तं युगपदेव अवलोक्यते। तत्र पर्यटितुं क्रीडितुं वा विस्तृतं समुद्रतटं वर्तते।

**(1) एकपदेन उत्तरत –** ½+½=1

**(क)** भारतस्य दक्षिणे कोणे किम् तीर्थस्थानं वर्तते?

**(ख)** कस्याः सान्निध्येन पावनमिदं तीर्थस्थानम्?

**(2) पूर्णवाक्येन उत्तरत –** ½+½=1

**(क)** कस्य दर्शनं युगपदमेव भवति?

**(ख)** भारतवर्षे कानि बहूनि सन्ति?

**(3) निर्देशानुसारम् उत्तरत –** ½+½=1

**(क)** 'भारतवर्षे बहूनि दर्शनीयानि तीर्थस्थानानि सन्ति' अत्र क्रियापदं किम्?

**(ख)** 'जीवनं पवित्रम्' इत्यनयोः विशेष्यपदं किम्?

**प्रश्न-2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**

वाल्मीकिः लौकिक-संस्कृतसाहित्यस्य आदिकविः मन्यते। तस्य रामायणं च आदिकाव्यं मन्यते। रामायणस्य रचनायाः कथा विलक्षणा अस्ति। कथ्यते यत् एकदा वाल्मीकिः तमसातीरे भ्रमन् आसीत्। अकस्मात् तस्य दृष्टिः एकेन व्याधेन शरेण विध्यमाने क्रोञ्चे अपतत्। एतत् कारुणिकं दृश्यं दृष्ट्वा सहसा वाल्मीकेः कण्ठात् एषा वाणी निःसृता। "मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः यत्क्रौञ्च-मिथुनादेकमवधीः काममोहितम्"।

**(1) एकपदेन उत्तरत-** ½×1=½

**(क)** आदिकाव्यं किं मन्यते?

**(2) पूर्णवाक्येन उत्तरत-** ½×1=½

**(क)** वाल्मीकिः कस्य आदिकविः मन्यते?

**(3) गद्यांशं पठित्वा तृतीयांशतुल्यं सारं लिखत।** 1×1=1

**(4) प्रदत्त गद्यांशस्य उचितं शीर्षकं लिखत।** 1×1=1

## खण्ड - ख
## रचनात्मक-कार्यम्

**प्रश्न-3. मञ्जूषातः पदानि विचित्य रिक्तस्थानानि पूरयित्वा स्व-अनुजस्य कृते पत्रं लिखत।** ½X10=5

**पित्रोः, त्वम्, पत्रम्, संस्कृतविषयस्य, अनुज, आशिषः, सिध्यन्ति, शोभनः, तव, प्राप्ताः**

प्रिय (i).......... रमेश

सस्नेहं (ii)............।

ह्य अहम् तव (iii)........... प्राप्तवान्।

(iv).........परीक्षा परिणामः (v).............अस्ति, परं संस्कृतविषये भवता न्यूना अंकाः (vi)............ इति सखेदं मया पठितम्। (vii).................प्रतिदिनं प्रातःकाले उत्थाय (viii)............अभ्यासं कुरु, संस्कृताध्यापकं च पुनःपुनः प्रश्नान् पृच्छ। अभ्यासेन एव सर्वाणि कार्याणि (IX).............। (X)...........चरणयोः सादरं प्रणामः।

भवतः अग्रजः

रामः।

**प्रश्न-4. अधोलिखितेषु विषयेषु एकं विषयम् अधिकृत्य संस्कृत-भाषायां लघुनिबन्धं लिख्यन्ताम्।**

(क) पर्यावरणम् (ख) मम विद्यालयः (ग) मम प्रियः नेता 5×1=5

## खण्ड - ग
## अनुप्रयुक्त-व्याकरणम्

**प्रश्न-5. अधोलिखित-वाक्येषु वाक्यानुगुणम् उचित-अव्ययपदं प्रदत्त-विकल्पेभ्यः चिनुत। (केवलं प्रश्नत्रयम्)** 1×3=3

**(क) सर्वं...........इदं ब्रह्म।**

(1) खलु (2) ननु (3) सदा (4) किल

**(ख) सिंहः वने ......... गर्जति।**

(1) तर्हि (2) उच्चैः (3) तदा (4) श्वः

**(ग) लता मेघा..........पाठं पठतः।**

(1) शनैः (2) यदि (3) च (4) तावत्

**(घ) अद्य रविवासरः, ..........सोमवासरः भविष्यति।**

(1) श्वः (2) इदानीं (3) कुतः (4) ह्यः

**प्रश्न-6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्त-विकल्पेभ्यः चिनुत। (केवलं प्रश्नद्वयम्)** 1x2=2

**(क) रामः राज्ञः पुत्रः आसीत्।**

(1) राजपुत्रः (2) राजापुत्र: (3) राज्ञपुत्रः (4) राज्ञापुत्रः

**(ख) ब्रह्मा चतुर्णाम् आननानां समाहारः भवति।**

(1) चातुराननः (2) चतुराननसमाहारः (3) चतुराननानाम् (4) चतुराननः

**(ग) अस्माकं विद्यालये महोत्सवः अस्ति।**

(1) महा उत्सवः (2) महान् उत्सवः (3) महत् उत्सवः (3) महो+उत्सवः

**प्रश्न-7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं प्रदत्त-विकल्पेभ्यः चिनुत।** 1x5=5

**(क) नृपेण प्रजाः पाल्+अनीयर्।**

(1) पालनीयाः (2) पालनीयः (3) पालनीयम् (4) पालनीयेन

**(ख) पठ्+शतृ छात्रः इतस्ततः पश्यति।**

(1) पठत् (2) पठति (3) पठन् (4) पठन्ती

**(ग) मुद्+शानच् ते गायन्ति।**

(1) मोदमानः (2) मोदमानाः (3) मोदमानम् (4) मोदमाने

**(घ) सिंहः मृगं खादितुम् इच्छति।**

(1) खाद्+क्त (2) खाद्+क्तवतु (3) खाद्+तुम् (4) खाद्+तुमुन्

**(ङ) पुत्रः पितरं प्रणम्य विद्यालयं गतवान्।**

(1) प्र+नम्+ल्यप् (2) प्र+नम्+यत् (3) प्र+नम्+क्त (4) प्र+णम्य

**प्रश्न-8. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्धं पदं प्रदत्त-विकल्पेभ्यः चिनुत। (केवलं प्रश्नत्रयम्)** 1×3=3

**(क) स: राधिका अस्ति।**

(1) सा (2) त्वम् (3) अहम् (4) ता:

**(ख) सायंकाले अनेकानि मानवाः भ्रमन्ति ।**

(1) अनेके (2) अनेकाः (3) अनेकम् (4) अनेक:

**(ग) श्वः नदीतीरे वनमहोत्सवः भवति।**

(1) भविष्यन्ति (2) भविष्यति (3) भविष्यसि (4) भविष्यतः

**(घ) वेदाः चतुरः सन्ति।**

(1) चतस्रः (2) चतुराः (3) चत्वाराः (4) चत्वारः

**प्रश्न-9. प्रदत्तेभ्यः विकल्पेभ्यः समुचित-कालबोधक-शब्दं चिनुत।** 1×4=4

**(क) माता प्रातः 08:00 उत्तिष्ठति।**

(1) सार्ध-अष्टवादने (2) अष्टवादने (3) पादोन-अष्टवादने (4) आष्टवादने

**(ख) चेतक-एक्सप्रेस इति रेलयानं 4:45 देहलीम् आगच्छति।**

(1) सार्ध-चतुर्वादने (2) पादोन-चतुर्वादने (3) पादोन-पञ्चवादने (4) सपाद-चतुर्वादने

**(ग) मल्लिका 7:30 प्रातराशं करोति।**

(1) सार्ध-सप्तवादने (2) सपाद-सप्तवादने (3) पादोन-सप्तवादने (4) सप्तवादने

**(घ) राहुलः प्रातर्भ्रमणाय 6:15 उद्यानं गच्छति ।**

(1) षड्वादने (2) सार्ध-षड्वादने (3) पादोन-षड्वादने (4) सपाद-षड्वादने

**प्रश्न-10. यथानिर्दिष्ट-धातूनां समुचितं पदपरिचयं प्रदत्तेभ्यः विकल्पेभ्यः चिनुत।**

**(केवलं प्रश्नत्रयम्)** 1X3 = 3

**(क) अभवत इत्यस्य पद-परिचयम्-**

**(1)** भू धातोः, लङ्लकारः, प्रथम-पुरुषः, एकवचनम्।

**(2)** भू धातोः, लङ्लकारः, मध्यम-पुरुषः, बहुवचनम्।

**(3)** भव् धातोः, लङ्लकारः, मध्यम-पुरुषः, बहुवचनम्।

**(4)** भव् धातोः, लङ्लकारः, प्रथम-पुरुषः, एकवचनम्।

**(ख) सेवते इत्यस्य पद-परिचयम्-**

**(1)** सेव् धातोः, लट्लकारः, उत्तम-पुरुषः, एकवचनम्।

**(2)** सेव् धातोः, लट्लकारः, मध्यम-पुरुषः, एकवचनम्।

**(3)** सेव् धातोः, लट्लकारः, प्रथम-पुरुषः, बहुवचनम्।

**(4)** सेव् धातोः, लट्लकारः, प्रथम-पुरुषः, एकवचनम्।

**(ग) द्रक्ष्यामः इत्यस्य पद-परिचयम्-**

**(1)** दृश् धातोः, लृट्लकारः, उत्तम-पुरुषः, बहुवचनम्।

**(2)** दृश् धातोः, लट्लकारः, उत्तम-पुरुषः, बहुवचनम्।

**(3)** दृश् धातोः, लृट्लकारः, उत्तम-पुरुषः, द्विवचनम्।

**(4)** दृश् धातोः, लृट्लकारः, उत्तम-पुरुषः, एकवचनम्।

**(घ) <u>पिबन्तु</u> इत्यस्य पद-परिचयम्-**

**(1)** पिब् धातोः, लट्लकारः, प्रथम-पुरुषः, बहुवचनम्।

**(2)** पा धातोः, लट्लकारः, मध्यम-पुरुषः, एकवचनम्।

**(3)** पा धातोः, लट्लकारः, प्रथम-पुरुषः, बहुवचनम्।

**(4)** पा धातोः, लट्लकारः, प्रथम-पुरुषः, एकवचनम्।

## खण्ड- घ
## पठित-अवबोधनम्

**प्रश्न-11. पठित-गद्य-पद्य-आधारित-अवबोधनकार्यम्-**

**(अ) अधोलिखित-पठितम् अनुच्छेदम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**

रामः - समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।

लवः - आवां यमलौ ।

रामः - सम्प्रति युज्यते । किं नामधेयम् ?

लवः - आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि (कुशं निर्दिश्य) आर्योऽपि गुरुचरणवन्दनायाम् …………

कुश: - अहमपि कुश इत्यात्मानं श्रावयामि।

रामः - अहो! उदात्तरम्यः समुदाचारः। किं नामधेयो भवतोर्गुरुः?

लवः - ननु भगवान् वाल्मीकिः।

रामः - केन सम्बन्धेन?

लवः - उपनयनोपदेशेन।

**(1) एकपदेन उत्तरत –** ½+½=1

**(क)** शरीरसन्निवेशः कीदृशः कथितः?

**(ख)** अत्र गुरुः कः अस्ति?

**(2) पूर्णवाक्येन उत्तरत –** ½+½=1

**(क)** कुशं कः निर्दिशति?

**(ख)** समुदाचारः कीदृशः अस्ति?

**(3) निर्देशानुसारम् उत्तरत –** ½+½=1

**(क)** "अहमपि कुश इत्यात्मानं श्रावयामि" वाक्येऽस्मिन् क्रियापदं किम्?

**(ख)** "भवतोर्गुरुः" इत्यस्य सन्धि-विच्छेदं कुरुत।

**(आ) अधोलिखितम् पद्यांशम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**

उदीरितोऽर्थः पशुनापि गृह्यते,

हयाश्च नागाश्च वहन्ति बोधिताः।

अनुक्तमप्यूहति पण्डितो जनः,

परेङ्गितज्ञानफला हि बुद्धयः॥

**(1) एकपदेन उत्तरत –** ½+½=1

**(क)** परेङ्गितज्ञानफला काः?

**(ख)** पशुनापि कः गृह्यते?

**(2) पूर्णवाक्येन उत्तरत –** ½+½=1

**(क)** उदीरितोऽर्थः केन गृह्यते?

**(ख)** पण्डितो जनः किम् ऊहति?

**(3) निर्देशानुसारम् उत्तरत –** ½+½=1

**(क)** "उक्तम्" इति पदस्य अत्र विलोमपदं किम्?

**(ख)** "उदीरितोऽर्थः" इत्यत्र विशेष्यपदं किम्?

**प्रश्न-12. पठित-गद्य-पद्ययोः हिन्दी-भाषायाम् अनुवादः।**

**(अ) अधोलिखित-गद्यांशयोः कस्यचिद् एकस्य गद्यांशस्य हिन्दी-भाषायाम् अनुवादं विधीयन्ताम्।**

2×1=2

**(क)** भो वासव पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। स: दीन इति जानन्नपि कृषक: तं बहुधा पीडयति। स: कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं स: न शक्नोति। एतत् भवान् पश्यति न? इति प्रत्यवोचत् । " भद्रे! नूनम्। सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम्?

**(ख)** जम्बुक: - यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्। स व्याघ्र: तथाकृत्वा काननं ययौ। शृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती-- जम्बुककृतोत्साहाद् व्याघ्रात् कथं मुच्यताम्? परं प्रत्युत्पन्नमति: सा जम्बुकमाक्षिपन्त्यङ्गुल्या तर्जयन्त्युवाच।

**(आ) अधोलिखित-पद्यांशयोः कस्यचिद् एकस्य पद्यांशस्य हिन्दी-भाषायाम् अनुवादं विधीयन्ताम्।**

2×1=2

**(क)** हृदिस्थानस्थितो वायुर्यदा वक्त्रं प्रपद्यते ।

व्यायामं कुर्वतो जन्तोस्तद् बलार्धस्य लक्षणम् ॥

**(ख)** प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टाः ।

पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा ॥

मानवाय जीवनं कामये नो जीवन्मरणम्। शुचि-पर्यावरणम्॥

**प्रश्न -13. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्)** ½×4= 2

**(क)** शकटीयानं **<u>कज्जलमलिनं</u>** धूम मुञ्चति।

**(ख)** पुरा त्वया **<u>मह्यम्</u>** व्याघ्रत्रयं दत्तम्।

**(ग)** व्यायामं कुर्वतः **<u>विरुद्ध</u>** भोजनं अपि परिपच्यते ।

**(घ)** **<u>धेनूनाम्</u>** माता सुरभिः आसीत् ।

**(ङ)** अयम् **<u>अन्येभ्यो</u>** दुर्बलः।

**प्रश्न-14. अधोलिखित-विलोमपदानाम् उचित-मेलनं कुरुत।** ½×4= 2

| | |
|---|---|
| **(क)** प्रसीदति | निर्बलः |
| **(ख)** मूर्खः | दुर्लभः |
| **(ग)** बली | अवसीदति |
| **(घ)** सुलभः | पण्डितः |

## प्रश्ननिर्माणकर्तारौ अशुद्धिसंशोधकौ

**(1)** नरेश मलोटिया

संस्कृत अध्यापक

राजकीय-आदर्श-कन्या-वरिष्ठ-माध्यमिक-विद्यालय-नादौनः,

डाकगृहम्- नादौन:, मण्डलम्- नादौन:, जनपदः - हमीरपुर:

(हिमाचल-प्रदेश:)- 177033

दूरवाणी-सङ्केतः - 9817707260, 8351007260

अणु-सङ्केतः - nareshmalotia087@gmail.com

**(2)** डॉ. नरेन्द्र राणा

संस्कृत अध्यापक

राजकीय-उच्च-विद्यालय-धारः

डाकगृहम्- कोटी उतरोऊ, मण्डलम्- शिलाई, जनपदः - सिरमौर:

(हिमाचल-प्रदेश:)- 173029

दूरवाणी-सङ्केतः - 8894136386,

अणु-सङ्केतः – rananarender319@gmail.com

Himachal Pradesh
Board of School Education
Dharamshala, Himachal Pradesh